संस्कृत

वेद

नं. ११३

निघंटशिरोमणि:

द्वितीयः पार्श्वः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीशंकर.

# श्रीनिघंटशिरोमणिः ।

## द्वितीयः पार्श्वः ( भागः ) ।

### ६ शाल्मल्यादिवर्गः ।

( प्रथमपार्श्वादग्रे )

६२ **गर्मोटिका** । **म०** गोडा लोणा गवत, जरडी । गर्मोटिका सुनीला च जरडी च जलाश्रया । **गुणाः** । जरडी मधुरा शीता सारिणी दाहहारिणी ॥ ८१ ॥ रक्तदोषहरा रुच्या पशूनां दुग्धदा ' नृपे ' । ६३ **मज्जर** । **म०** पवना गवत । **गु०** मज्जरतृण । मज्जरः पवनः प्रोक्तः सुतृणः स्निग्धपत्रकः । **गुणाः** । मृदुग्रंथिश्च मधुरो धनुदुग्धकरो ' नृपे '॥८२॥ ६४ **पत्राढ्य** । **म०** शेंडे गवत । **गु०** पत्राढ्य । तृणाढ्यं पर्वततृणं पत्राढ्यं च मृगप्रियं । **गुणाः** । बलपुष्टिकरं रुच्यं पशूनां सर्वदा हितं ॥ ८३ ॥ ६५ **वंशपत्री** । **म०** वंशपत्री गवत । **गु०** वंशपत्री तृण । वंशपत्री वंशदला जीरिका जीर्णपत्रिका । **गुणाः** । वंशपत्री सुमधुरा शिशिरा पित्तनाशिनी ॥ ८४ ॥ रक्तदोषहरा रुच्या पशूनां दुग्धदा ' नृपे ' । ६६ **मंथानक** । **म०** मारवेल, मुरें गवत । **गु०** मंथानक । मंथानकस्तु हरितो दृढमूलस्तृणाधिपः ॥ ८५ ॥ **गुणाः** । स्निग्धो धेनुप्रियो दोग्धा मधुरो बहुवीर्यकः । ६७ **पल्लिवाह** । **म०** पोकळी गवत, तांबडे पातीचें । **गु०** पाल्लिवाह । पल्लिवाहो दीर्घतृणः सुपत्रस्ताम्रवर्णकः ॥ ८६ ॥ **गुणाः** । अदृढः शाकपत्रादि पशूनामबलप्रदः । ६८ **लवणतृण** । **म०** लोणागवत । **गु०** लवणतृण । लवण-

तृणं लोणतृणं तृणाम्लं पटुतृणकमम्लकांडं च। गुणाः । पटुतृणकं क्षाराम्लं कषायस्तन्यमश्ववृद्धिकरं ॥ ८७ ॥ ६९ पण्यंध । म० पंधें गवत । गु० पण्यंध । पण्यंधः कंगुणीपत्रः पण्यंधा पणधा 'नृप' ॥ ८८ ॥ गुणाः । पण्यंधा समवीर्या स्यात्तिक्ता क्षारा च सारिणी । तत्कालशस्त्रघातस्य व्रणसरोपणी परा ॥ ८९ ॥ दीर्घा मध्या तथा ऱ्हस्वा पण्यंधा त्रिविधा स्मृता । ७० दीर्घकांड । म० तिधारी लव्हा—लव्हाळें । गु० तृणविशेष। गुंडस्तुकांडगुंडस्याद्दीर्घकांडस्त्रिकोणकः ॥ ९० ॥ छत्रगुच्छोऽसिपत्रश्च नीलपत्रास्त्रिधारकः । ७१ लघुगुंड । म० लघु लव्हाळें । गु० तृणविशेष । ७२ वृत्तगुंड । म० वाटोळें लव्हाळें । गु० तृणविशेष । वृत्तगुंडोऽपरोवृत्तो दीर्घनालो जलाश्रयः ॥ ९१ ॥ तत्र स्थूलो लघुश्चान्यस्त्रिधाऽयं 'राजनामके' । गुणाः । गुंडास्तु मधुराः शीताः कफपित्तातिसारहाः ॥ ९२ ॥ दाहरक्तहरास्तेषां मध्ये स्थूलतरोऽधिकः । ७३ गुडकंद । म० कचरा, कचरे । गु० कचरो । गुडकंदः कसेरुः स्यात्क्षुद्रमुस्ता कसेरुका ॥ ९३ ॥ सूकरेष्टः सुगंधिकः सुकंदो गंधकंदलः । प्रोक्तो 'राजनिघंटे' तु भिषग्विद्याविशारदैः ॥ ९४ ॥ राजकसेरुकश्चैव श्यामकंदो 'मदे' तथा । गुणाः । कसेरुकः कषायोऽल्पमधुरोऽतिखरस्तथा ॥ ९५ ॥ दाहहा श्रमहा शीतो रक्तपित्तघ्नको 'नृपे' । हिमो रूक्षश्च मधुरः संग्राही शुक्रलस्तथा ॥ ९६ ॥ कफकृत्वातकृच्चैव प्रोक्तो 'केयनिघंटके' नेत्ररोगहरः प्रोक्तो वैद्यै 'भावप्रकाशके' ॥ ९७ ॥ ७४ चणिका । म० वर्णया गवत, चणई । गु० चणई । चणिका दुग्धदा गौल्या सुनीला क्षेत्रजा हिमा । गुणाः । ृ्या बल्याऽतिमधुरा बीजैः पशुहिता तृणैः ॥ ९८ ॥ ७५ गुंडासिनी । म० पाणकणीस । गु० पान्यघाडाडी । गुंडासिनी तु गुंडा च गुंडाला गुच्छमूलका । ।चपिटा तृणपत्री च जलवासा सुविष्टरा ॥ ९ ९॥ पृथुला तु तथा प्रोक्ता 'राजनामनिघंटके' । गुणाः । गुडासिनी कटुः स्वादे पित्तदाहश्रमापहा ॥ २४०० ॥ तिक्तोष्णा श्वयथुघ्नी च व्रणघ्नी 'राजनामके, ।

७६ **शूली** । **म॰** सुळें गवत । **गु॰** शूली । शूली तु शूलपत्री स्यादशाखा धूम्रमूलिका ॥ १ ॥ जलाश्रया मृदुलता पिच्छला महिषीप्रिया ॥ **गुणाः** । शूली तु पिच्छिला चोष्णा गुरुर्गौल्या बलप्रदा ॥ २ ॥ पित्तदाहहरा रुच्या दुग्धवृद्धिप्रदा ' नृपे ' ॥ ७७ ॥ **परिपेलु** । **म॰** क्षुद्रमोथ, केवटीमोथ, जलमुस्ता । **गु॰** केवटीमोथ । परिपेलं प्लवं वन्यं गोपुटं स्यात्कुटन्नटं ॥ ३ ॥ सितपुष्पं दासपुरं गोनर्दं जीर्णबुध्नकं । प्रोक्तं ' राजनिघंटे ' तु वैद्यविद्याविचक्षणैः ॥ ४ ॥ वितुन्नकं शुकाह्वं च कैवर्तीमुस्तकं पुटं । वानेयं गोपुरं चैव ' भावनामनिघंटके ' ॥ ५ ॥ तथा दासपुरं चैव ' कोशे ' तु परिपेलवं । **गुणाः** ॥ परिपेलं कटूष्णं च कफमारुतनाशिनं ॥ ६ ॥ व्रणदाहामशूलघ्नं रक्तदोषहरं ' नृपे ' । कफपित्तास्रहं चैव तथा विसर्पहं ' कये ' ॥ ७ ॥ सुगंधिकं च प्रस्वेदमलकंडूविनाशनं । कफवातहरं मेध्यं कांतिदं ' धन्वनामके ' ॥ ८ ॥ ' द्रव्ये ' दाहहरं प्रोक्तं मंदं त्वर्शोविनाशनं । कफपित्तहरं प्रोक्तं वैद्यै'र्गणनिघंटके' ॥ ९ ॥ ७८ **हिज्जल** । **म॰** परळ । **गु॰** जलजांबवो । हिज्जुलोऽथ नदीकांतो जलजो दीर्घपत्रकः । नदीजो निचुलो रक्तकार्मुकः कथितो ' नृपे ' ॥ १० ॥ ततो नदीकार्मुकश्च निम्नगो रक्तमंजरी । तोयजातस्तु संप्रोक्तो ' कयदेवनिघंटके ' ॥ ११ ॥ तोयजः कविभिश्चैव प्रोक्तो ' गणनिघंटके ' । **गुणाः** । हिज्जुलः कटूष्णश्च पवित्रो भूतनाशनः ॥ १२ ॥ वातघ्नो ग्रहदोषघ्नो ' राजनामनिघंटके ' । कटुतिक्तः कषायश्च मेदः कृमिबलासहा ॥ १३ ॥ शोफोदरहरं चैव ' कयदेवनिघंटके ' । ॥ ७९ ॥ **शैवाल** । **म॰** शेवाळें । **गु॰** शेवाळ, लील ॥ शैवालं जलनीली स्याच्छेवलं जलजं ' नृपे ' ॥ १४ ॥ **गुणाः** । शैवालं शीतलं स्निग्धं व्रणसंतापहृ ' न्नृपे ' । ' भावे ' तु तुवरं तिक्तं मधुरं दाहतृट्हरं ॥ १५ ॥ पित्तरक्तज्वरघ्नं च प्रोक्तं वैद्यैर्न संशयः ।

॥ इति शाल्मल्यादिवर्गः समाप्तः ॥

## ७ प्रभद्रादिवर्गः

१ **प्रभद्र**। **म०** कडू निंब । **गु०** लिंबडो । प्रभद्रः पिचुमंदश्च निंबस्तु पारिभद्रकः ॥ १६ ॥ तथा काकफलश्चैव कीटाऽरिष्ट एव च। धगनः सर्वतोभद्रः शीतश्च पीतसारकः ॥ १७ ॥ वरतिक्तोऽरिष्टफलो ज्येष्ठामलक एव च। छर्दनो हिंगुनिर्यासो यवनेष्टस्तथैव च ॥ १८ ॥ नेताऽग्निधमनश्चैव 'नृपे' विशीर्णपर्णकः। सुतिक्तको नियमनो 'धन्वंतरिनिघंटके' ॥ १९ ॥ शुकप्रियः सुभद्रश्च कृमिघ्नः 'कयदेवके'। सुतिक्तो 'मदने' चैव पिचुमर्दस्तु 'भाविके' ॥ २० ॥ पवनेष्टस्तथा प्रोक्तो भिषग्विद्याविशारदैः। **गुणाः**। निंबः शीतस्तु तिक्तश्च कफव्रणबलासहा ॥ २१ ॥ कृमिशोफविषघ्नश्च पित्तहृद्दाहहा 'नृपे'। कुष्ठकृमिच्छर्दिहरः प्रोक्तो 'धन्वनिघंटके' ॥२२॥ अपक्वशोफपचनः पक्वव्रणविशोधनः। पाके कटुर्वातलश्च ग्राही हृद्यस्तु मेहहा ॥२३॥ ज्वरकासारुचिहरस्तृषा हृल्लासरक्तहा। तत्फलं तु रसे पाके भेदनं तूष्णमेव हि ॥२४॥ कुष्ठगुल्मार्शकृमिहृन्मेहहृ 'त्कैयदेवके'। नेत्र्यं 'भावप्रकाशे' तु प्रोक्तं वैद्यैर्नसंशयः ॥ २५ ॥ २ **महानिंब**। **म०** बकाणनिंब। **गु०** बकान। महानिंबा महोद्रेकः कार्मुकः केशमुष्टिकः। कार्कोडो रम्यकः क्षीरो महातिक्तो हिमद्रुमः ॥ २६ ॥ प्रोक्तो 'राजनिघंटे' तु 'धन्वे' च विषमुष्टिकः। निंबवरो निंबरको द्रकः प्रोक्तस्तथा ध्रुवं ॥ २७ ॥ निंबरः 'कयदेवे' तु गिरिको मालकस्तथा। बृहन्निंबो 'गणे' प्रोक्तस्तथा च शुकशालकः ॥ २८ ॥ **गुणाः**। महानिंबस्तु शिशिरः कषायः कटुतिक्तकः। अस्रदाहबलासघ्नो विषमज्वरहा 'नृपे' ॥ २९ ॥ शीतपित्तकफघ्नश्च विषूचीकुष्ठहा 'धंन'। रूक्षो ग्राही रक्तपित्तविषकृमिहरः 'कये' ॥ ३० ॥ रक्तहृल्लासच्छर्दिघ्नो श्लेष्मपित्तहरो 'मदे'। कफपित्तप्रमेहघ्नो गुल्मार्शःश्वासनाशनः ॥ ३१ ॥ मूषकानां विषघ्नश्च प्रोक्तो 'भावप्रकाशके'। ३ **कैडर्य**। **म०** महारुख, कवठ्यानिंब । **गु०** अरडूसो । कैडर्योऽन्यो

महानिंबो रामणो रमणस्तथा ॥ ३२ ॥ गिरिनिंबो महारिष्टः शुक्रशालोलकाव्हयः । 'नृपे' प्रोक्तस्तथा 'धन्वे' च्छर्दिघ्नः पिचुमंदकः ॥ ३३ ॥ पार्वतो हिंगुनिर्यासः प्रियशालो वरत्वचः । **गुणाः** । कैडर्यः कटुकस्तिक्तः कषायः शीतलो लघुः ॥ ३४ ॥ संतापशोषकुष्ठास्रक्रिमिभूतविषापहः । ४ **भूनिंब** । **म०** पाले किराईत । **गु०** पानकरियातु । भूनिंबो नार्यतिक्तः स्यात्कैरातो रामसेनकः ॥३५॥ कैराततिक्तको हैमः कांडतिक्तः किरातकः। प्रोक्तो 'राजनिघंटे' तु भिषग्विद्याविशारदैः ॥ ३६ ॥ **गुणाः** । भूनिंबो वातलस्तिक्तः कफपित्तज्वरापहः । व्रणसंरोपणः पथ्यः कुष्ठकंडूतिशोफनुत् ॥ ३७ ॥ ५ **नेपाल** । **म०** किराईत, काडेचिराईत । **गु०** करियातु। नेपालनिंबो नैपालस्तृणनिंबो ज्वरांतकः । नाडीतिक्तोऽर्धतिक्तश्च निद्रारिः सन्निपातहा ॥ ३८ ॥ 'नृपे' प्रोक्तो तथा 'धन्वे' महातिक्तश्च तिक्तकः । **गुणाः** । नेपालनिंबः शीतोष्णः कफपित्तास्रशोफहा ॥३९ ॥ लघुतिक्तो योगवाही तृष्णाज्वरहरो 'नृपे' । कासघ्नश्च तथा प्रोक्तो 'धन्वंतरिनिघंटके' ॥ ४० ॥ रूक्षो रसे तु तिक्तः स्यात्सरो मेहहरो ध्रुवं । श्वासकासारुचिहरो दाहशोषविनाशनः ॥ ४१ ॥ क्रिमिहा 'कैयदेवे' च 'द्रव्यरत्ने' त्रिदोषहा । ६ **कट्फल** । **म०** कुंभी, तांबडा कुंभा, कायफळ । **गु०** कायफळ । कट्फलः कृष्णगर्भश्च सोमवल्कः प्रचेतसी ॥ ४२॥भद्रावती महाकुंभी कैडर्यो रामसेनकः । कुमुदा चोग्रगंधश्च भद्रा रंजनकस्तथा ॥ ४३॥ कुंभी च लघुकाश्मर्यः श्रीपर्णी 'राजनामके' । महावल्कः कुंभिका च कुंभा च सोमपादपः ॥ ४४॥ त्रुटी चैव महाकुंभी रोहिणी 'कयदेवके' । तथा कुमुदिका चैव प्रोक्ता 'भावप्रकाशके' ॥ ४५ ॥ **गुणाः** । कट्फलः कटूष्णश्च कासश्वासज्वरापहः । उग्रदाहहरो रुच्यो मुखरोगहरो 'नृपे' ॥ ४६ ॥ अर्शोयक्ष्मापहा चैव 'कैयदेवनिघंटके' । दाहपित्तज्वरक्रिमियोनिदोषहरो ध्रुवम् ॥ ४७ ॥ रक्तातिसारजित्प्रोक्तो वैद्यै 'गणनिघंटके' । कफवातहरो चैवं गुल्ममेहाग्निमांद्यजित् ॥ ४८ ॥ पांडुरोगामग्रहणीहृल्लासघ्नो 'धंन' तथा । ज्वरकंठामयकफकंडुघ्नश्च तथा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

'मदे' ॥ ४९ ॥ ७ **अग्निमंथ म०** नरवेल ( कोकणांत प्रसिद्ध ) । **गु०** अरणी । अग्निमंथोऽग्निमथनस्तर्कारी वैजयंतिका । वह्निमंथोरणा केतुः श्रीपर्णी कर्णिका जया ॥ ५० ॥ नादेयी विजयाऽनंता नदीजा 'राजनामके'। जयो जयंती संप्रोक्ता 'भावे' तु गणिकारिका ॥५१॥ अग्निमंथनसंज्ञश्च मंथनो विजयंतिका । तथैव वह्निमथनस्तथा चारणिका मता ॥ ५२ ॥ अरणीकेतुश्च संप्रोक्तो 'धन्वंतरिनिघंटके'। पावकाह्वा च गणिका 'कैये' पावकमंथनः ॥ ५३ ॥ **गुणाः** । तर्कारी कटुरुष्णा च तिक्तानिलकफापहा । शोफश्लेष्माग्निमांद्यार्शोविड्बंधाध्मानहा 'नृपे' ॥ ५४ ॥ आमपांडुहरः प्रोक्तो 'धन्वंतरिनिघंटके' । अग्निदश्चोष्णवीर्यश्च 'कैयदेवनिघंटके' ॥ ५५ ॥ ८ **क्षुद्राग्निमंथ । म०** ऐरण, टाकळी । **गु०** नहानी अरणी । क्षुद्राग्निमंथस्तपनो विजया गणिकारिका । अरणिर्लघुमंथश्च तेजोवृक्षस्तनुत्वचा ॥ ५६ ॥ प्रोक्तो 'राजनिघंटे' तु रक्तांगो 'धन्वनामके' । हविर्मंथस्तेजोमंथो हरिमंथः कृशानुगः ॥ ५७ ॥ प्रोक्तो 'कैयनिघंटे' तु वैद्यविद्याविशारदैः । जयाह्वाऽरणिका चैव वह्निनिर्मंथना 'गणे' ॥ ५८ ॥ **गुणाः** । क्षुद्राग्निमंथः कथितः पूर्वोक्तगुणावान् 'नृपे'। कटुतिक्तोथ चोष्णश्च वातपांडुहरो ध्रुवं ॥ ५९ ॥ शोफश्लेष्माग्निमांद्यघ्नो विबंधामहरो 'धने'। अग्निदश्चोष्णवीर्यश्च कफहा 'कैयदेवके' ॥६०॥ 'द्रव्ये' बलासहा चैव कफमेदोहरो 'गणे'। ९ **श्योनाक । म०** दिंडा । **गु०** अरलु, मरमठय । स्योनाकः शुकनासर्क्षः कट्वंगोऽथ कटंभरः ॥ ६१ ॥ मयूरजंघोऽरलुकः प्रियजीवः कुटंनटः । प्रोक्तो 'राजनिघंटे' तु भिषग्विद्याविशारदैः ॥ ६२ ॥ १० **भूतसार । म०** टटू पिंवळा टेटू । स्योनाकः पृथुशिंबोऽन्यो भल्लको दीर्घवृंतकः। पीतवृक्षश्च टुंटूको भूतसारो मुनिद्रुमः ॥ ६३ ॥ निःसारः फल्गुवृंताकः पूतिपत्रो वतंसकः । मंडूकपर्णः पीतांगो जंबूकः पीतपादपः ॥ ६४ ॥ वातारिः पीतकः शोणः कुनटश्च विरेचनः । भ्रमरेष्टा बहिर्जंघा 'राजनामनिघंटके' ॥ ६५ ॥ टिंटुको भल्लको भल्लो भूतवृक्षस्तु 'कैयके'।

' कोशे ' टुंटुकः पत्रोर्णः शोणकश्चारलुर्नटः॥ ६६ ॥ **गुणाः** । स्योनाकयुगुलं तिक्तं शीतलं च त्रिदोषजित् । पित्तश्लेष्मातिसारघ्नं सन्निपातहरं ' नृपे ' ॥ ६७ ॥ टेंटूफलं कटूष्णं च कफवातहरं लघु । दीपनं पाचनं हृद्यं रुचिकृल्लवणाम्लकं ॥ ६८ ॥ पित्तवांतिहरं प्रोक्तं ' द्रव्यनामनिघंटके ' । तत्फलं तु भवेद्रूक्षं कफवातविनाशनं ॥ ६९ ॥ हृद्यं कषायं गुल्मघ्नं लघुदीपनमर्शोहृत् । कृमिहृत् वातलं चैव गुरु ' भावप्रकाशके '॥७०॥ पुटपाकप्रयोगेण चिरातिसारजित् ध्रुवं । कफवातहरश्चैव प्रोक्तो ' गणनिघंटके ' ॥ ७१ ॥ ११ **मेषशृंगी** । **म०** मेढशिंगी, खरशिंग । **गु०** मेढाशिंग । अजशृंगी मेषशृंगी सर्पदंष्ट्रा च वर्तिका । चक्षुष्या तिक्तदुग्धा च पुत्रश्रेणी विषाणिका ॥ ७२ ॥ प्रोक्ता ' राजनिघंटे ' तु विषाणी ' भावनामके ' । कूर्चपर्णी मेढ्रवल्ली सुपुच्छिका तु ' कैयके ' ॥ ७३ ॥ मेषवल्ली मेषपुष्पा महाकाल्यक्षिभेषजा । प्रोक्ता ' मदनपाले ' तु तथा मेषविषाणिका ॥ ७४ ॥ **गुणाः** । अजशृंगी कटुस्तिक्ता कफार्शः शूलशोफजित् । चक्षुष्या श्वासहृद्रोगविषकासार्तिकुष्ठजित् ॥ ७५ ॥ अजशृंगीफलं तिक्तं कटूष्णं कफवातजित् । जठरानलकृत् हृद्यं रुचिदं लवणाम्लकं ॥ ७६ ॥ प्रोक्तं ' राजनिघंटे ' तु ' धन्वे ' स्वादुर्हिमा तथा । वमितृष्णापहा ' कैये ' रूक्षा पित्तव्रणापहा ॥ ७७ ॥ तत्फलं कफमेहघ्नं दीपनं कृमिनाशनं । विषकासहरं प्रोक्तं वैद्यै ' र्भावप्रकाशके ' ॥७८॥ तिमिरघ्नं कफघ्नं च श्लेष्मपित्तहरं ध्रुवं । वर्णकृत्कामनिघ्नं च प्रोक्तं ' गणनिघंटके '॥ ७९॥ १२ **काश्मरी** । **म०** शिवण। **गु०** शवन्य। काश्मर्यः काश्मरी हीरा कृष्णवृंता तु कट्फला । सर्वतोभद्रिका भद्रा सिंधुपर्णी तु क्षीरिणी ॥ ८० ॥ सुभद्रा भद्रपर्णी च कंभारी कुमुदा तथा । मधुपर्णी महाभद्रा गोपभद्रा विदारिणी ॥ ८१ ॥ स्वभद्रा रोहिणी गृष्टिः कृष्णा श्वेता च मेदिनी । स्थूलत्वचा मधुमती सुफला सुदृढत्वचा ॥८२॥ महाकुमुदनाम्नी च श्रीपर्णी ' राजनामके ' । ' धन्वे ' प्रोक्ता तु गंभारी काश्मर्या कृष्णवृंतिका ॥ ८३ ॥ ' कैयदेवनिघंटे ' तु संप्रोक्ता मुद्रिका

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

मही । तथा मधुरसा चैव 'भावे' तु पीतरोहिणी ॥ ८४ ॥ **गुणाः** । काश्मरी कटुका तिक्ता गुरूष्णा कफशोफनुत् । त्रिदोषविषदाहार्ति-ज्वरतृष्णास्रदोषजित् ॥ ८५ ॥ प्रोक्ता 'राजनिघंटे' तु भिषग्विद्याविशारदैः । तत्फलं तु हिमं स्निग्धं गुरु हृद्यं च बृंहणं ॥ ८६ ॥ शुक्रलं चैव केश्यं च मेध्यं मूत्रविबंधहृत् । दाहवाततृषाघ्नं च रक्तपित्तहरं ध्रुवं ॥ ८७ ॥ क्षतक्षयहरं प्रोक्तं वैद्यैः 'कैयनिघंटके' । रक्तपित्तज्वरघ्नं च पुष्पं वृष्यं च बल्यकं ॥ ८८ ॥ कफपित्तहरं प्रोक्तं 'धन्वंतरिनिघंटके' । मधुरा चैव वीर्योष्णा ह्यामशूलविनाशिनी ॥ ८९ ॥ तत्पुष्पं मधुरं शीतं संग्राहि वातलं ध्रुवं । पाके कषायमधुरं पित्तासृङ्नाशनं तथा ॥ ९० ॥ कफपित्तहरं 'कैये' त्वर्शोघ्नं 'भावनामके' । १३ **अश्मंतक** । **म०** आपटा । **गु०** आशोंदरो । अश्मंतकश्चंदुकश्च कुद्दालस्ताम्रपत्रकः ॥ ९१ ॥ अश्मांतकश्चंदुशःफर्ही शिलान्तश्चांबुदः स्मृतः । पाषाणान्तक इत्युक्तो 'राजनामनिघंटके' ॥ ९२ ॥ चंद्रकः कुशली चैव तथा यमलपत्रकः । श्लक्ष्णत्वङ्मालकापत्रो 'धन्वन्तरिनिघंटके' ॥ ९३ ॥ पापहरोऽश्मयोनिश्च 'कैयदेवनिघंटके' । युग्मपत्रो 'द्रव्यरत्ने' 'मदने' पापनाशनः ॥ ९४ ॥ भिषग्विद्याप्रवीणैस्तु संप्रोक्तो यमलच्छदः । **गुणाः** । अश्मंतकस्तु मधुरः कषायः शीतलो ध्रुवं ॥ ९५ ॥ पित्तप्रमेहदाहघ्नो तृट्विषमज्वरापहः । विषच्छर्दिभूतनिघ्नः प्रोक्तो 'राजनिघंटके' ॥ ९६ ॥ तत्पुष्पं तु भवेद्रूक्षं रक्तपित्तविनाशनं । प्रदरक्षयकासघ्नं प्रोक्तं 'भावप्रकाशके' ॥ ९७ ॥ कफपित्तहरं प्रोक्तं 'धन्वंतरिनिघंटके' । अम्लो ग्राही वातकफगंडमालास्रनाशनः ॥ ९८ ॥ गलगंडादिरोगघ्नः तत्फलं वैद्यनायकैः । आध्मानकारकं प्रोक्तं 'कैयदेवनिघंटके' ॥ ९९ ॥ शस्त्रव्रणहरं प्रोक्तं 'द्रव्यरत्ने' भिषग्वरैः । वातातिसारनिघ्नं च प्रोक्तं 'गणनिघंटके' ॥ २५०० ॥

१४ **कर्णिकार** । **म०** लघु बाहवा । **गु०** लहानो गरमाळो । कर्णिकारो राजतरुः प्रग्रहः कृतमालकः । परिव्याधो व्याधिरिपुः सुफलः पंक्तिबीजकः ॥ १ ॥ प्रोक्तो 'राजनिघंटे' तु तथा 'धन्वनिघंटके' ।

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

आरोग्यशिंबी शम्याको व्याधिघातो व्यथांतकः ॥ २ ॥ ' केये ' रैवतः कल्पद्रुः स्वर्णद्रुश्चोपघातकः । **गुणाः** । कर्णिकारो रसे तिक्तः कटूष्णः कफशूलहृत् ॥ ३ ॥ उदरकृमिमेहघ्नो व्रणगुल्महरो ' नृपे '। १५ **आरग्वध** । **म०** थोर बाहवा । **गु०** मोटो गरमाळो । आरग्वधोऽन्यो मंथानो रोचनश्चतुरंगुलः ॥ ४ ॥ आरेवतो दीर्घफलो व्याधिघातो नृपद्रुमः । हेमपुष्पो राजतरुः कंडूघ्नश्च ज्वरान्तकः ॥ ५ ॥ अरुजः स्वर्णपुष्पश्च स्वर्णद्रुः कुष्ठसूदनः । कर्णाभरणकः प्रोक्तो महाराजद्रुमः स्मृतः ॥ ६ ॥ कर्णिकारो महाद्रिः स्यात्प्रोक्तो ' राजनिघंटके '। व्याधिघ्नश्चैव कर्णी च ' धन्वंतरिनिघंटके ' ॥ ७ ॥ ' द्रव्यं ' ' केये ' व्याधिजिच्च नराधिप्युपघातकः । ' मदे ' ' भावे ' तथाऽरोग्यः स्वर्णागः स्वर्णभूषणः ॥ ८ ॥ ' कोश ' सुवर्णकश्चैव ' गुणे ' च त्वधरेचनः । **गुणाः** । आरग्वधोऽतिमधुरः शीतः शूलापहारकः ॥ ९ ॥ ज्वरकंडूकुष्ठमेहकफविष्टंभहा ' नृपे '। रसे तिक्तो गुरूष्णश्च कृच्छ्रगुल्मत्रिदोषजित् ॥ १० ॥ उदरकृमिहृत्प्रोक्तो ' धन्वंतरिनिघंटके '। तत्पुष्पं शिशिरं स्वादु कषायं ग्राहि वातलं ॥ ११ ॥ पाके कटु कुष्ठहरं कफपित्तविनाशनं । मज्जागुणः स्वादुः पाके ह्यग्निकृत्स्निग्ध एव च ॥ १२ ॥ हिमस्तिक्तो मधुश्चैव मृदुरेचनकारकः । व्रणोदावर्तहृद्रोगवातपित्तहरः ' केये ' ॥ १३ ॥ त्रिदोषघ्नी तु मज्जा च रक्तपित्तहरा ' मदे '। १६ **वृश्चिकाली** । **म०** लघु मेढशिंगी । **गु०** नहानी मेढाशिंगी । वृश्चिकाली विषाणी च विषघ्नी नेत्ररोगहा ॥ १४ ॥ उष्ट्रिकाऽप्यलिपर्णी च दक्षिणावर्तकी तथा । कालिकाऽप्यागमावर्ता देवलांगुलिका तथा ॥ १५ ॥ करभी भूरिदुग्धा च कर्कशा चामरा च सा । स्वर्णपुष्पा युग्मफला तथा क्षीरविषाणिका ॥ १६ ॥ तथा भासुरपुष्पा च ' राजनामनिघंटके '। वृश्चिपत्री कालनेमी प्रोक्ता वैद्यविशारदैः ॥ १७ ॥ **गुणाः** । वृश्चिकाली कटुस्तिक्ता सोष्णा हृद्वक्त्रशुद्धिकृत् । रक्तपित्तहरा बल्या विबंधारोचकापहा ॥१८ ॥ १७ **कुटज** । **म०** कुडा । **गु०** कडो । कुटजः



Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

कौटजो शक्रो वत्सको गिरिमल्लिका। कलिंगो मल्लिकापुष्पः प्रावृण्यः शक्रपादपः ॥ १९ ॥ वरतिक्तो यवफलः संग्राही पांडुरद्रुमः। प्रावृषेण्यो महागंधः प्रोक्तो ' राजनिघंटके ' ॥ २० ॥ कौटश्चेंद्रवृक्षश्च ' धन्वंतरिनिघंटके '। तथा ' मदनपाले ' तु कोटी च शत्रुभूरुहः ॥ २१ ॥ शत्रुवृक्षः शत्रुशाखी प्रोक्तो ' भावप्रकाशके '। **गुणाः**। कुटजः कटुतिक्तोष्णः कषायश्चातिसारजित् ॥ २२ ॥ प्रोक्तो ' राजनिघंटे ' तु पुरातनचिकित्सकैः। आमहा ' भावनाम्नि ' तु ग्राही रक्तार्शहा ' गणे ' ॥ २३ ॥ शीतः कुष्ठातिसारघ्नो गुदरोगहरो ' धने '। ' कये ' रूक्षो दीपनश्च कफतृड्जंतुहा ध्रुवं ॥ २४ ॥ तत्पुष्पं वातलं प्रोक्तं पुरातनचिकित्सकैः। १८ **कृष्णकुटज**। म० काळा कुडा। गु० काळो कडो। कृष्णाऽन्यः कुटजश्चैव मल्लिका नीलयष्टिका ॥ २५ ॥ तथैव वंशकुटजः कृष्णशत्रुतरुस्तथा। **गुणाः**। कृष्णशक्राऽस्रपित्तघ्नस्त्वग्दोषार्शोनिकृंतनः ॥२६॥ १९ **इंद्रयव**। म० इंद्रजव। गु० इंदरजव। इंद्रयवा तु शक्राह्वा शक्रबीजानि वत्सकः। तथा वत्सकबीजानि भद्रजा कुटजाफलं ॥ २७ ॥ ज्ञेया भद्रयवा चैवं बीजान्ता कुटजाभिधा। तथा कलिंगबीजानि ' राजनामनिघंटके ' ॥ २८ ॥ कलिंगकस्तु ' धन्वं ' तु यवः ' कये ' तु कौटजः। इंद्रो यवफलं ऐंद्रयवस्तु ' मदने ' तथा ॥ २९ ॥ ततो कूटजबीजं च कलिंगं ' भावनामकं '। शक्राशनस्तु शक्राह्वः शतक्रतुयवो ' गणे ' ॥ ३० ॥ **गुणाः**। इंद्रयवस्तु संप्रोक्तः कटुतिक्तश्च शीतलः। कफवातहरश्चैव रक्तपित्तविनाशकः ॥ ३१ ॥ दाहातिसारशूलघ्नो नानाज्वरहरो ' नृपे '। गुदकीलास्रभ्रांतिघ्नः प्रोक्तो ' भावप्रकाशके ' ॥ ३२ ॥ रक्तार्शोरक्तसारघ्नः कृमिशूलघ्नदीपनः। त्रिदोषहा भिषक्श्रेष्ठैः प्रोक्तो ' धन्वनिघंटके ' ॥ ३३ ॥ ' कये ' विसर्पकुष्ठघ्नो वातरक्तहरः स्मृतः। २० **शिरीष**। म० शिरसाचें झाड। गु० शरशडो। शिरीषः सितपुष्पश्च भंडिको मृदुपुष्पकः ॥ ३४ ॥ उद्दानकः शुकतरुर्ज्ञेयो लोमशपुष्पकः। कपीतनः कलिंगश्च श्यामलः शंखिनीफलः ॥ ३५ ॥ मधुपुष्पो वृत्तपुष्पः प्रोक्तो

‘राजनिघंटके’। शुकप्रियः श्यामवर्णो ‘धन्वन्तरिनिघंटके’॥ ३६॥ मंडीरो भंडिलो विप्रो प्लवंगश्च कपीतनः। भंडी प्लवंगकः ‘केये’ शुकपुष्पः शुकद्रुमः॥ ३७॥ शुकवृक्षो मधुपुष्पः प्रोक्तो ‘गणनिघंटके’। **गुणाः**। शिरीषः कटुशीतश्च पामावातविषापहः॥ ३८॥ त्वग्दोषकंडुकुष्ठार्शोनाशनो ‘नृपनामके’। लघुर्वर्ण्यस्त्रिदोषघ्नः श्वासकासहरो ‘धन्वे’॥ ३९॥ विसर्पशोथहा प्रोक्तः ‘कयदेवे’ भिषग्जनैः। कफपित्तहरः प्रोक्तो ‘गणनामनिघंटके’॥ ४०॥ २१ **करंज**। **म०** करंज। **गु०** करंज। करंजो नक्तमालश्च पूतिकश्चिरबिल्वकः। पूतिपर्णो वृद्धफलो रोचनश्च प्रकीर्यकः॥ ४१॥ प्रोक्तो ‘राजनिघंटे’ तु ‘कोशे’ च करजस्तथा। नक्ताह्वो गुच्छपुष्पश्च ‘कयदेवनिघंटके’॥४२॥ **गुणाः**। करंजः कटुरुष्णश्च चक्षुष्यो वातनाशनः। तस्य स्नेहोऽतिस्निग्धश्च वातघ्नः स्थिरदीप्तिदः॥ ४३॥ प्रोक्तो ‘राजनिघंटे’ तु ‘धन्वे’ वातकफघ्नकः। प्लीहोदावर्तगुल्मघ्नस्तत्फलं कफवातहृत्॥ ४४॥ पित्तलं चाष्टगुल्मघ्नं अर्शोगुल्मविनाशनं। योनिदोषहरः ‘केये’ व्रणकृमिहरः स्मृतः॥ ४५॥ पाके रसे कटुस्तिक्तः कषायश्चोष्णवीर्यदः। विषकुष्ठबलासघ्नः कुष्ठपित्तास्रहा ध्रुवं॥ ४६॥ योनिदोषकृमिघ्नश्च तत्पत्रं जंतुनाशनं। कफवातार्शःशोफघ्नं व्रणहृत् ‘कयदेवके’॥ ४७॥ तदंकुरः कटुः पाके रसे दीपनपाचनः। २२ **घृतकरंज**। **म०** चोपडा करंज। **गु०** घोरा करंज। ‘नृपे’ घृतकरंजः स्यात्प्रकीर्यो घृतपर्णकः॥ ४८॥ स्निग्धपत्रस्तपस्वी च विषारिश्च विरोचनः। ‘धन्वे’ गौरस्तथा ‘भावे’ घृतपूर्णः प्रकीर्तितः॥ ४९॥ घृतपूरस्तथा प्रोक्तः ‘केये’ तु पुष्पमंजरी। **गुणाः**। ततो घृतकरंजस्तु कटूष्णो व्रणवातहा॥ ५०॥ विषविसर्पत्वग्दोषनाशनो ‘राजनामके’॥ २३ **महाकरंज**। **म०** थोर करंज। **कों०** वावळा। **गु०** चरेल। ज्ञेयो महाकरंजोऽन्यः षड्ग्रंथो हस्तिचारिणी॥ ५१॥ उदकीर्यो विषघ्नी च काकघ्नी मदहस्तिनी। अंगारवल्ली शार्ङ्गेष्टा मधुमत्तश्च वायसी॥ ५२॥ हस्तिरोहणकश्चैव ज्ञेयो हस्तिकरंजकः। सुमना काकभांडी च मदमत्तश्च

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

' राजके ' ॥ ५३ ॥ हस्तिनी उदकीर्णश्च तथैव हस्तिवारुणी । रोहि-कप्रियसंज्ञश्च तथा च करभंडिका ॥ ५४ ॥ ' धन्वंतरिनिघंटे ' तु संप्रोक्ता करभंजिका । ' भावे ' च मर्कटी चैव केये तु मातृनंदनः ॥ ५५ ॥ करंजकस्तथा प्रोक्तो ' गणनामनिघंटके ' । **गुणाः** । महाकरंजास्तिक्तोष्णः कटुको विषनाशनः ॥ ५६ ॥ कंडूविवर्चिकाकुष्ठत्वग्दोषव्रणहा ' नृपे ' । महकुष्ठच्छर्दिक्रिमिनाशकः ' केयदेवके ' ॥ ५७ ॥ २४ **पूतिकरंज** । **म०** घाणेरा करंज । **गु०** दुर्गंध करंज । प्रकीर्यो रजनीपुष्पः सुमनाः पूतिकर्णकः । पूतिकरंजः कैडर्यः कलिमालश्च ' राजके ' ॥ ५८ ॥ २५ **गुच्छकरंज** । **म०** गांडे करंज । **गु०** गुच्छकरंज । गुच्छकरंजो गुच्छी च सानंदो गुच्छपुच्छकः । स्निग्धदलो मातृनंदी नंदी च दंतधावनः ॥ ५९ ॥ **गुणाः** । करंजः कटुतिक्तोष्णो विषवातार्तिनाशनः । कंडूविचर्चिकाकुष्ठस्पर्शत्वग्दोषहा ' नृपे ' ॥ ६० ॥ २६ **रीठाकरंज** । **म०** रिठा । **गु०** अरिठा । अथ रीठाकरंजश्च गुच्छलो गुच्छपुष्पकः । रीठा गुच्छफलोऽरिष्टो मंगल्यः कुंभबीजकः ॥ ६१ ॥ प्रकीर्यः सोमवल्कश्च फेनिलो ' राजनामके ' । कुंभबीजो गर्भपाती रक्तबीजस्तथैव च ॥ ६२ ॥ रक्षाबीजः ' केयदेवे ' ' मदने ' चार्थसाधनः । तथा ' भावप्रकाशे ' तु मांगल्यः कृष्णवर्णकः ॥ ६३ ॥ **गुणाः** । रीठाकरंजास्तिक्तोष्णः कटुस्निग्धश्च वातजित् । कफघ्नः कुष्ठकंडूतिविषविस्फोटहा ' नृपे ' ॥ ६४ ॥ पाके कटुर्लेखनश्च लघुर्दोषत्रयापहः । गर्भपाती ग्रहहरः प्रोक्तः ' केयनिघंटके ' ॥ ६५ ॥ २७ **अंकोल** । **म०** , **गु०** अंकोल । अंकोलः कोटरो रेची गूढपत्रो निकोचकः । गुप्तस्नेहः पीतसारो मदनो गूढमल्लिका ॥ ६६ ॥ पीतस्ताम्रफलो ज्ञेयो दीर्घकीलो गुणाढ्यकः । कोलको लंबकर्णश्च गंधपुष्पश्च रोचनः ॥ ६७ ॥ विज्ञानतैलगर्भश्च ' राजनामनिघंटके ' । ' धन्वंतरिनिघंटे ' तु अंकाटस्तु निकोचनः ॥ ६८ ॥ भूषिता भूसुता चैव हुंडिका ' केयदेवके ' । कोटश्चैवरिकीलश्च ' गणनामनिघंटके ' ॥ ६९ ॥ **गुणाः** ।

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अंकोलः कटुकः स्निग्धो विषलूतादिदोषनुत् । कफानिलहरः सूतः शुद्धिकृद्रेचनो 'नृपे' ॥ ७० ॥ शूलशोफव्रणघ्नश्च कृमिवैसर्पहा ध्रुवं । कफपित्तामानिघ्नश्च तत्फलं शीतश्लेष्मलं ॥ ७१ ॥ मधुरं तु रसे पाके स्निग्धं वृष्यं च बृहणं। रक्तपित्तानिलहरः पित्तदाहहरस्तथा ॥ ७२ ॥ क्षतक्षयविनाशश्च प्रोक्तः 'कैयनिघंटके'। स्निग्धस्तिक्तोष्णकश्चैव वांतिकृच्च सरस्तथा ॥ ७३ ॥ श्वानाखुगृहजंतूनां विषघ्नो भूतनाशनः। कटिशूलहरः प्रोक्तो 'धन्वंतरिनिघंटके' ॥ ७४ ॥ मार्जारविषनिघ्नश्च 'द्रव्यरत्ने' प्रकीर्तितः । अतिसारहरश्चैव सर्पाणां विषनाशनः ॥ ७५ ॥ पित्तकृद्भिषजां श्रेष्ठैः प्रोक्तो 'गणनिघंटके'। २८ **नीलवृक्ष** । म० , गु० नीळवृक्ष । नीलस्तु नीलवृक्षश्च वातारिः शोफनाशनः ॥ ७६ ॥ नरनामा नखालुश्च नखवृक्षो नखप्रियः । **गुणाः** । नीलवृक्षस्तु कटुकः कषायोष्णो लघुस्तथा ॥ ७७ ॥ वातामयप्रशमनो नानाश्वयथुहा 'नृपे'। २९ **सर्ज** । म० थोर राळेचा वृक्ष । गु० राळनुं मोटुं झाड । सर्जः सर्जरसः शालः कालकूटो रजोद्भवः ॥ ७८ ॥ वल्लीवृक्षश्चीरपर्णो रालः कार्श्योऽजकर्णकः । बस्तकर्णः कषायी च ललनो गंधवृक्षकः ॥७९॥ वंशश्च शालनिर्यासो दिव्यसारः सुरेष्टकः । शूरोऽग्निवल्लभश्चैव यक्षधूपः सुसिद्धकः ॥८०॥ 'नृपे' प्रोक्तो तथा 'धन्वे' सस्यसंवरकः स्मृतः । स्वेदघ्नश्च लतावृक्षः कुदेहो 'द्रव्यनामके' ॥ ८१ ॥ देवधूपस्तथा 'भावे' रसनिर्यासको 'गणे'। कल्याणी श्रीतरुः कांतः कांतिवृक्षस्तथा स्मृतः ॥ ८२ ॥ मद्ययोनिः स्वेदहरो कुशरीरस्तथैव च । सालस्तु 'कोशे' संप्रोक्तो 'कैये' तु रंजनद्रुमः ॥ ८३ ॥ **गुणाः** । सर्जस्तु कटुतिक्तोष्णो हिमः स्निग्धोऽतिसारजित् । पित्तास्रकुष्ठकंडूघ्नो वातविस्फोटहा 'नृपे' ॥ ८४ ॥ वर्ण्यो रूक्षः कफघ्नश्च 'धन्वंतरिनिघंटके'। नेत्ररुक्कृमिहृत्पित्तव्रणहृत् 'द्रव्यनामके' ॥ ८५ ॥ 'मदे' स्वेदहरः प्रोक्तः पुरातनचिकित्सकैः । पांडुश्रुतिगदघ्नश्च मेहघ्नो 'भावनामके' ॥ ८६ ॥ ३० **अश्वकर्ण** । म० लघु राळेचा वृक्ष । गु०

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

राळनुं नहानुं झाड । जरणद्रुमोऽश्वकर्णो दीर्घपर्णश्च कौशिकः । तार्क्ष्य-प्रसवकश्चैव सस्यसंवरणस्तदा ॥ ८७ ॥ कुशिकतरुस्तु धन्यां ' राजनामनिघंटके ' । दीर्घवृक्षोऽरण्यः ' कैये ' ' धन्वे ' तु चिरपत्रकः ॥ ८८ ॥ **गुणाः** । अश्वकर्णः कटुस्तिक्तो स्निग्धः पित्तास्रनाशनः । ज्वरविस्फोट-कंडूघ्नः शिरोर्तिनाशनो ' नृपे ' ॥ ८९ ॥ मेहकुष्ठव्रणकफहरः प्रोक्तो ' गणे ' तथा । ३१ **ताल** । **म०** खरताल, ताडवृक्ष । आंध्रदेशांत प्रसिद्ध । **गु०** ताड । तालस्तालद्रुमः पत्री दीर्घस्कंधो ध्वजद्रुमः ॥ ९० ॥ तृणराजो मधुरसो मदाढ्यो दीर्घपादपः । चिरायुस्तरुराजश्च गज-भक्षो दृढच्छदः ॥ ९१ ॥ दीर्घपत्रो गुच्छपत्रोऽप्यासवद्रुश्च ' राजके '। तथा दुरारुहः प्रांशुः ' धन्वे ' चैव द्रुमेश्वरः ॥ ९२ ॥ ' भावे ' महोन्नतश्चैव तथा ' गणनिघंटके ' । ध्वजवृक्षो मद्ययोनिर्ध्वजः खलः शठस्तथा ॥ ९३ ॥ दीर्घदंडो महावृक्षः श्रीबीजः ' कैयदेवके ' । **गुणाः** । तालः सरः शीत-पित्तदाहश्रमकफघ्नकः ॥ ९४ ॥ पित्तघ्नो मधुरश्चैव शोषनुन्मदकृ ' न्नृपे ' । तत्फलं तु सरं बल्यं विष्टंभि बृंहणं ' तथा ' ॥ ९५ ॥ ' कैये ' च तर्पणं वृष्यं कफमांसहरं ध्रुवं । पित्तदाहक्षयघ्नं च वातपित्तास्रनाशनं ॥ ९६ ॥ बीजं शुक्रकरं हैमं तात पित्तहरं ध्रुवं । श्लेष्मलो वातपित्तघ्नः स्नेहस्तु मधुरः सरः ॥ ९७ ॥ ' मेद ' प्रोक्तः फलं ' धन्वे ' गुरु स्वादु च पित्तहृत् । बीजं तत्स्वादु पाके च तन्मूलं रक्तपित्तहृत् ॥ ९८ ॥ श्लेष्मकृत्बलकृच्चैव शुक्रकृद्बृंहणं तथा । वातपित्तव्रणहरं तथैव कृमिनाशनं ॥ ९९ ॥ तद्बीजं मूत्रकृत् ' कैये ' ' मदने ' मदकृद्रसः । तदस्थिगुणः संप्रोक्तो पित्तकृद्वातहृत्तथा ॥ २६०० ॥ ३२ **श्रीताल** । **म०** श्रीताड, मलबार देशांत प्रसिद्ध; याच्या पानांवर ग्रंथ लिहितात । **गु०** श्रीताड । श्रीतालो मृदुतालश्च लक्ष्मीतालो मृदुच्छदः । विशा-लपत्रो लेखार्हो मषीलेख्यदलस्तथा ॥ १ ॥ शिरालपत्रकश्चैव याम्योद्भूतस्तु 'राजके' । लेख्यपत्रस्तथा प्रोक्तो ' धन्वंतरिनिघंटके ' ॥ २ ॥ **गुणाः** । श्रीतालो मधुरोऽत्यन्तमीषच्चैव कषायकः । पित्तजित्कफकारी च ईष-द्वातकरो 'नृपे' ॥ ३ ॥ ३३ **हिंताल** । **म०** थोर ताड, कांटे ताड ।

गु० कांटावालो ताड। हा दक्षिणेंत प्रसिद्ध । हिंतालः स्थूलतालश्च वल्कपत्रो बृहद्दलः। गर्भस्त्रावी नीलतालो भीषणो बहुकंटकः ॥ ४ ॥ स्थिरपत्रो द्विधालेख्यः शिरापत्रः स्थिरांघ्रिकः। अम्लसारो बृहत्तालो 'राजनामनिघंटके'॥ ५ ॥ **गुणाः**। हिंतालो मधुराम्लश्च कफकृत्पित्त-दाहनुत्। श्रमतृष्णापहारी च शिशिरोवातहृ 'न्नृपे' ॥ ६ ॥ **३४ माड**। **म०** माड, भेर्लीमाड; कोंकणांत प्रसिद्ध। **गु०** माड। माडो माडद्रुमो दीर्घो ध्वजवृक्षो वितानकः। मद्यद्रुमो मोहकारी मदद्रु रज्जु 'राजके' ॥ ७ ॥ **गुणाः**। माडस्तु शिशिरो रुच्यः कषायः पित्तदाहकृत्। तृष्णा-पहो मरुत्कारी श्रमहृच्छ्लेष्मकृ 'न्नृपे' ॥ ८ ॥ **३५ तूला**। **म०** पारसा पिंपळ। **कों०** भेंडीचें झाड। **गु०** पारस पीपळो। तूलं तूदं ब्रह्मकाष्ठं ब्राह्मणेष्टं च यूपकं। ब्रह्मदारु सुपुष्पं च सुरूपं नीलवृंतकं ॥ ९ ॥ क्रमुकं विप्रकाष्ठंच मृदुसारं तु 'राजके'। 'धन्वे' तु नूदं संप्रोक्तं ब्रह्मण्यं ब्रह्मचारिणं ॥ १० ॥ कपिचूतः कपिवासस्तथैव क्षीरपादपः। कपीतन-स्तथा 'केये' परीशो 'भावनामके' ॥ ११ ॥ गर्दभांडः कंदरालः कमंडलुः सुपार्श्वकः। बली तु फालिका चैव वानीरो 'सगनामके'॥ १२ ॥ **गुणाः**। मधुराम्लं नृपे तूलं वातपित्तहरं सरं। दाहप्रशमनं वृष्यं कषायं कफनाशनं ॥ १३ ॥ 'धन्वे' चैव फलं स्वादु बलवर्णाभिवृद्धिकृत्। दुर्जरं तु भवेत्स्निग्धं कृमिकृच्छुक्रकृत्तथा ॥१४॥ कफकृ 'त्केयदेवे' च 'द्रव्ये' वंगविनाशनः ॥ **३६** ॥ **तमाल**। **म०** तमालवृक्ष। **गु०** तमाल। तमालो नीलतालः स्यात्कालस्कंधस्तमालकः ॥१५॥ नीलध्वजश्च तापिच्छः कालतालो महाबलः। 'नृपे' प्रोक्तो 'मदे' चैव लोकस्तंधोऽसि-तद्रुमः ॥ १६ ॥ **गुणाः**। तमालो मधुरो बल्यो वृष्यश्च शिशिरो गुरुः। कफपित्ततृषादाहश्रमभ्रांतिहरो 'नृपे' ॥ १७॥ विस्फोटशोफहृत्प्रोक्तः 'केयदेवनिघंटके'। ३७। **कदंब**। **म०** **कळंब**। **गु०** कदंब, कलम। कदंबो वृत्तपुष्पश्च सुरभिर्ललनाप्रियः ॥ १८ ॥ कादंबर्यः सिंधुपुष्पो मदाढ्यः कर्णपूरकः। 'नृपे' प्रोक्तस्तथा 'केये' कुत्सितांगः कदंबकः ॥१९॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

सुवासः सिंधुपुष्पश्च 'धन्वंतरिनिघंटके'। 'भावे' तु प्रियकश्चैव 'कोशे' नीपः प्रियस्तथा ॥ २० ॥ बलभद्रो 'गणे' प्रोक्तः षट्पदाधार एव च। **गुणाः।** कदंबस्तु कटुस्तिक्तः कषायो वातनाशनः॥२१॥ शीतलः कफपित्तघ्नः शुक्रवृद्धिकरो 'नृपे'। सरो विष्टंभकृद्रूक्षः कफघ्नः स्तन्यदो 'मदे' ॥ २२ ॥ग्राही वर्णकरश्चैव योनिदोषहरो गुरुः। व्रणास्रगुल्मकुष्ठघ्नो दाहास्रविषहृत्तथा ॥ २३ ॥ तत्फलं च भवेत्स्वम्लं रुच्यं वीर्योष्णकं ध्रुवं । श्लेष्मलं गुरु वातघ्नं कफपित्तकरं 'कये' ॥ २४ ॥ ३८ **धाराकदंब । म० , गु०** धाराकदंब । धाराकदंबः प्रावृष्यः पुलकी भृंगवल्लभः । मेघागमप्रियो नीपः प्रावृषेण्यः कदंबकः ॥ २५ ॥ 'नृपे' प्रोक्तस्तथा 'धन्व' कादंबर्यो हरिप्रियः। अलिप्रियः 'कयदेवे' तथैव पर्वताह्वयः॥ २६ ॥ तथा गिरिकदंबश्च 'मदे' चैव महोन्नतः। ३९ **धूलिकदंब । म०, गु०** धूलीकदंब । धूलीकदंबश्च फलप्रसूनः परागपुष्पो बलभद्रसंज्ञकः। वसंतपुष्पो मकरंदवासो भृंगप्रियो रेणुकदंबकश्च ॥ २७॥ 'नृप' 'धन्वे' तु नीपश्च सुवासो वृत्तपुष्पकः ॥ २८ ॥ ततो राजकदंबश्च प्रोक्तो 'मदनपालके'। हलिप्रियः 'कैयदेवे' तथा नर्तापहारकः ॥ २९ ॥ ४० **भूमिकदंब । म० , गु०** भूमिकदंब । भूमिकदंबो भूनीपो भूमिजो भृंगवल्लभः। लघुपुष्पो वृत्तपुष्पो विषघ्नो व्रणहारकः ॥ ३० ॥ **गुणाः।** त्रिकदंबाः कटुवर्ण्या विषशोफहरा हिमाः । कषायास्तिक्तपित्तघ्ना वीर्यवृद्धिकरा 'नृपे' ॥ ३१ ॥ ४१ **जलवेतस । म०** जलवेतस, वांजूळ। **गु०** जलवेतस । वानीरो वृत्तपुष्पश्च शाखालो जलवेतसः । व्याधिघातः परिव्याधो नादेयो जलसंभवः ॥ ३२ ॥ 'नृपे' प्रोक्तस्तथा 'धन्वे' संवृतो वंजुलः स्मृतः। जलकामो मेघपुष्पो नादेयी तु निकुंभकः॥ ३३ ॥ तोयकामो नदीकांतो नदीकूलप्रियस्तथा । निकुंजकोऽबुजश्चैव विदुलो बंधुवेतसः ॥ ३४ ॥ सुशीतः क्षीरवृक्षस्तु 'कैयदेवनिघंटके'। 'मदने' तु जलौकश्च निचुलोऽभोज एवच ॥ ३५ ॥ 'भावे' तु जलजश्चैव कुशलो 'गणनामके'। **गुणाः** । वानीरस्तिक्तशिशिरो संग्राही च

Shri Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

कषायकः ॥ ३६ ॥ रक्षोघ्नो व्रणपित्तास्रकफघ्नो 'राजनामके'। वैद्यै- 'मदनपाले' तु संप्रोक्तो वातकोपनः ॥ ३७ ॥ ४२ **कुंभी** । **म०** लघु कुंभी, पांढरी कुंभी । **गु०** कुंभी । कुंभी रोमालुविटपी रोमशः पर्पटद्रुमः । **गुणाः** । कुंभी कटुः कषायोष्णो ग्राही वातकफापहः ॥ ३८ ॥ ४३ **वेतसः** । **म०** वेत । **गु०** नेतर । वेतसो निचुलो ज्ञेयो वंजुलो दीर्घ- पत्रकः । कलनो मंजरीनम्रः सुषेणो गंधपुष्पकः॥ ३९ ॥ प्रोक्तो 'राज- निघंटे' तु कलंजो 'धन्वनामके'। रथो नम्रः पत्रमालो वानीर- सत्त्वपुष्पकः ॥ ४० ॥ नादेयो गंधपुष्पश्च सुषेणः 'केयदेवके'। शीतश्चैव तथा प्रोक्तो 'भावनामनिघंटके' ॥ ४१ ॥ **गुणाः** । वेतसः कटुकः स्वादुः शीतो भूतविनाशनः। कुष्ठघ्नो रक्तपित्तघ्नः प्रोक्तो 'राजनिघंटके' ॥ ४२ ॥ 'धन्वे' तिक्तस्तु रक्षोघ्नः कषायी व्रणशोधनः । कफाप- हस्तथा प्रोक्तो वैद्यविद्याविशारदैः ॥ ४३ ॥ ४४ **धवः** । म० धावडा । गु० धावडो । धवो दृढतरुर्गौरः कषायो मधुरत्वचः । शुक्लवृक्षः पांडुतरुर्धवलः पांडुरो 'नृपे' ॥ ४४ ॥ स्थिरोदृढः शक- टाख्यः शकटाक्षो भवोद्वहः । धुरंधरः 'केयदेवे' 'भावे' उदितरुर्घटः॥४५॥ **गुणाः**। धनकषायः कटुकः कफघ्नोऽनिलनाशनः । पित्तप्रकोपनो रुच्यो दीपनो 'राजनामके' ॥ ४६ ॥ शीततो मधुमेहघ्नो पांडुहृत् कफपित्त- हृत् । तिक्तस्त्रिदोषदाहघ्नस्तुवरस्त्वर्शशोफहृत् ॥ ४७ ॥ तच्छाखा तु भवेत्क्षारा वातला नैव संशयः । तत्पत्रं शीतलं प्रोक्तं विपाके कटुकं तथा ॥ ४८ ॥ श्लेष्मपित्तार्शहृच्चैव कदाचिन्नैव वातलं । फलं स्वादु कषायं च रूक्षमम्लं भवेद्ध्रुवम् ॥ ४९ ॥ 'केये' प्रोक्तं तथा 'भावे' अश्मरीकृच्छ्रनाशनः । रक्तव्रणविसर्पघ्नो योनिरोगहर- स्तथा ॥ ५० ॥ अतिसारतृषाहृच्च प्रोक्तो वैद्यविशारदैः । ४५ **धन्वनः** । **म०** धामण । **गु०** धामण । धन्वनो रक्तकुसुमो धनुर्वृक्षो महाबलः ॥ ५१ ॥ रुजापहः पिच्छलको रूक्षः स्वादुफलो 'नृप'। गोत्रद्रुमो गोत्रपुष्पो धर्मणः सारवृक्षकः ॥ ५२ ॥ धन्वांगो

गोत्रविटपी ‘ केये ’ ‘ द्रव्ये ’ तथैव च । सुतेजनो धनुर्वृक्षो ‘ भावनामनिघंटके ’ ॥५३॥ **गुणाः** । धन्वनः कटुकोष्णश्च कषायः कफनाशनः । दाहशोषकरो ग्राही कंठामयहरो ‘ नृपे ’ ॥५४॥ कफपीनसकासघ्नो रक्तदोषहरो ‘ द्रवे ’। पित्तानिलहरश्चैव स्वादुरूक्षश्च ‘ केयके ’ ॥ ५५ ॥ तत्फलं तु हिमं स्वादु कषायं कफवातहृत् । कफपित्तार्शहृच्चैव ‘ मदे ’ ‘ भावे ’ तथा स्मृतः ॥ ५६ ॥ बृंहणो बलकृच्चैव संधिकृद्व्रणरोपणः । ४६ **भूर्जपत्रः**। **म०, गु०** भोजपत्र । भुजो वल्कद्रुमो भूर्जः सुचर्मा भूर्जपत्रकः ॥ ५७ ॥ चित्रत्वग्बिंदुपत्रश्च रक्षापत्रो विचित्रकः। भूतघ्नो मृदुपत्रश्च शैलेंद्रस्थस्तु ‘ राजके ’ ॥ ५८ ॥ सुचर्मको बहुपटो मृदुत्वक्च स्थिरच्छदः । बहुवल्कश्चीरपत्रो भूतहा लिख्यपत्रकः॥ ५९ ॥ ‘ केये ’ प्रोक्तो युग्मपत्रः कूर्चभाक् ‘ द्रव्यरत्नके ’ । बहुचर्मी ‘ मदे ’ ‘ भावे ’ चर्मी बहुलवल्कलः ॥ ६० ॥ चित्रपत्रश्छत्रपत्रो बहुत्वक्च मृदुच्छदः । प्रोक्तो ‘ गणनिघंटे ’ तु ग्रहघ्नो धूपयोगिकः ॥६१॥ **गुणाः**। भूर्जः कटुकषायोष्णो भूतरक्षाकरः परः । त्रिदोषशमनः पथ्यो दुष्टकौटिल्यहा ‘ नृपे ’ ॥ ६२ ॥ पित्तरक्तबलासघ्नो मेदः कर्णरुजापहः । विषव्रणहरः प्रोक्तः ‘ कयदेवनिघंटके ’ ॥ ६३ ॥ ४७ **तिनिश** । **म०** तिवस । **गु०** मिणोहरमो । तिनिशः स्यंदनश्चक्री रथांगः शकटो रथः। रथिका भस्मगर्भश्च नेमी जलधरो ‘ नृपे ’ ॥ ६४ ॥ सुगर्भको ह्यश्मगर्भश्चक्रसंवरणः ‘ कये ’। रथद्रुर्वंजुलो ‘ भावे ’ सर्वसारस्तु ‘ द्रव्यके’ ॥ ६५ ॥ अतिमुक्तो वंजुलश्च ‘ कोशे ’ तु चित्रकृत्तथा । **गुणाः** । तिनिशस्तु कशायोष्णः कफरक्तातिसारजित् ॥ ६६ ॥ ग्राहको दाहजननो वातामयहरो ‘ नृपे ’। श्लेष्मपित्तास्रहा प्रोक्तो ‘ द्रव्यनामनिघंटके ’॥ ६७ ॥ चित्रकुष्ठव्रणक्रिमिपांडुदाहप्रमेहहा । बलासपित्तमेदोघ्नः ‘ केयदेवनिघंटके ’ ॥ ६८ ॥ ४८ **अर्जुन** । **म०** अर्जुनसादडा । **गु०** धोळो साजड । अर्जुनः शंबरः पार्थश्चित्रयोधी धनंजयः । वीरांतकः क्रिरीटी च गांडीवी शिवमल्लकः ॥६९॥ सव्यसाची नदीसर्जः कर्णारिः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

कुरुवीरकः । कौंतेय इंद्रसूनुश्च वीरद्रुः कृष्णसारथिः ॥ ७० ॥ पृथाजः फाल्गुनो धन्वी ककुभो ' राजनामके '। ' धन्वे ' तु पांडवश्चैव तथा ' केयनिघंटके ' ॥ ७१ ॥ धूर्तस्तु भूरुहश्चैव मधुगंधप्रसूनकः । मधुगंधः पुष्पफलो ' गणे ' 'द्रव्ये' शठद्रुमः ॥ ७२ ॥ इंद्रद्रुर्वीरवृक्षश्च वीरश्च धवलो ' भवे '। ततो वीरतरुश्चैव प्रोक्त 'स्त्वमरकोशके' ॥ ७३ ॥ **गुणाः** । अर्जुनस्तु कषायोष्णः कफघ्नो व्रणनाशनः । पित्त-श्रमतृषार्तिघ्नो मारुतामयहा ' नृपे ' ॥ ७४ ॥ ' धन्वे ' पथ्यः क्षते भग्ने रक्तस्तंभनकृद्भवेत् । अस्थिभग्नेस्थिसंहारे हितश्चाढ्या-निलापहः ॥ ७५ ॥ वातघ्नो ' द्रव्यरत्ने ' तु पांडुरोगहरो ' गणे '। शीतः पित्तकफघ्नश्च व्रणमेहहरो ध्रुवं ॥ ७६ ॥ स्वरभंगं रक्तदोषं क्षत-क्षयरुजं तथा । हंतीति ' केयदेवे ' च ' मदे ' रक्तविषापहः ॥ ७७ ॥ ४९ **हरिद्रु** । **म**० हळदिवा वृक्ष । **गु**० हलदरवो । हरिद्रुः पीतदारुः स्यात्पीतकाष्ठश्च पीतकः । कदंबकः सुपुष्पश्च सुराव्हः पीतकद्रुमः ॥७८॥ प्रोक्तो ' राजनिघंटे ' तु तथा ' केयनिघंटके '। श्रीमान् कदंबपुष्पश्च पीतकाष्ठो हरिद्रकः ॥ ७९ ॥ गौरद्रुपीतवर्णश्च ' द्रव्ये ' गौरद्रुमो वरः । **गुणाः** । हरिद्रुः शीतलस्तिक्तो मंगल्यः पित्तवांतिजित् ॥ ८० ॥ अंगकांतिकरो बल्यो नानात्वग्दोषहा ' नृपे '। पाके कटुश्च वीर्योष्णः किंचित्कफविनाशनः ॥ ८१ ॥ ' केयदेवनिघंटे ' तु हितश्च व्रणरो-पणे । ५० **दग्धरुहा** । **म**० रामेठा । दग्धा दग्धरुहा प्रोक्ता दग्धिका च स्थलेरुहा ॥ ८२ ॥ रोमशा कर्कशदला भस्मरोहा सुदग्धिका । **गुणाः** । दग्धा कटुः कषायोष्णा कफवातनिकृंतनी ॥ ८३ ॥ पित्तप्रको-पनी सा च ' नृपे ' चैवाग्निदीपनी । ५१ **शाखोट** । **म**० सागसाहोडा, हेदी, हेदू । **गु**० साहोडा । शाखोटो भूतवृक्षश्च पीतोजक्षीरनाशनः ॥ ८४ ॥ घूकावासो गवाक्षी च कौशिक्यो भूर्जपत्रकः । ' नृपे ' प्रोक्तो ' मदे ' चैव भूतावासः खरच्छदः ॥ ८५ ॥ ' द्रव्ये ' पीतफलश्चैव छागीक्षीरविनाशनः । **गुणाः** । शाखोटश्चैव तिक्तोष्णः पित्तकृद्वातहा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

' नृपे ' ॥ ८६ ॥ रक्तार्शोवातरक्तघ्नः कफपित्तातिसारहा । शोषपित्तानिलहरो वृष्यो निर्यास उच्यते ॥ ८७ ॥ ' मदे ' प्रोक्तो ' द्रव्यरत्ने ' रक्तातिसारहृत्तथा । ५२ **शाक** । **म०** साग । **गु०** शाग । शाकः ककचपत्रः स्यात्खरपत्रोऽतिपत्रकः ॥ ८८ ॥ महीसहः श्रेष्ठकाष्ठः स्थीरसारो गृहद्रुमः । ' नृप ' प्रोक्तस्तथा ' भावे द्वारदारुः प्रकीर्तितः॥८९॥ करच्छदो भूमिसहो ' धन्वे ' दीर्घ छदः स्मृतः । महापत्रकः स्थिरकः वरदारुः खरच्छदः ॥ ९० ॥ ' कैये ' ' गणे ' महादारुस्तथा सुगंधसारकः । **गुणाः** । शाको ' नृपे ' सारकश्च पित्तदाहश्रमापहः ॥९१॥ कफघ्नं मधुरं रुच्यं कषायं शाकवल्कलं । रक्तपित्तप्रसादश्च शिशिरः कुष्ठहा ध्रुवं ॥ ९२ ॥ श्लेष्मानिलहरश्चैव गर्भसंधानकृत्तथा । ' कैये ' प्रोक्तस्तथा ' द्रव्ये ' बलासघ्नः प्रकीर्तितः ॥ ९३ ॥ वातपित्तविसर्पघ्नो वातरक्तप्रसादनः । प्रोक्तो ' गणनिघंटे ' तु भिषग्विद्याविशारदैः ॥९४॥ ५३ **शिंशपा** । **म०** काळा शिसवा । **गु०** शिशम । शिंशपा तु महाश्यामा कृष्णसारा च धूम्रिका । तीक्ष्णसारा च धीरा च कपिला कृष्णशिंशपा ॥ ९५ ॥ ' नृप ' प्रोक्तो वारणश्च ' धन्वे ' चैव गुरुः स्मृतः। पिच्छिलांगारसारश्च ' कैये ' मंडलपत्रिका ॥ ९६ ॥ तीक्ष्णश्चैव ' गणे ' प्रोक्तः ' कोशे ' त्वगरुशिंशपा । **गुणाः** । श्यामादिशिंशपा तिक्ता कटूष्णा कफवातनुत् ॥ ९७ ॥ नष्टाजीर्णहरा दीप्या शोफातिसारहृ ' न्नृपे ' । ५४ **श्वेतशिंशपा** । **म०** पांढरा शिसवा । **गु०** धोळू शिशम । शिंशपान्या श्वेतपत्रा सिताव्हादिश्च शिंशपा ॥ ९८ ॥ **गुणाः** । श्वेतादिशिंशपा तिक्ता शिशिरा पित्तदाहनुत् । ५५ **कपिल शिंशपा** । **म०** पिंवळा शिसवा । **गु०** पीळो शिशम । कपिला शिंशपा चान्या पीता कपिलशिंशपा ॥ ९९ ॥ सारिणी कपिलाक्षी च भस्मगर्भा कुशिंशपा । ' नृप ' प्रोक्ता तथा ' धन्वे ' वसादनी तथैव सा॥२७००॥ भस्मश्च पिंगला चैव ' कैयदेवनिघंटके ' । **गुणाः** । कपिला शिंशपा तिक्ता शीतवीर्या श्रमापहा ॥ १ ॥ वातपित्तज्वरघ्नी च च्छर्दिहिक्काहरा

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com